ॐ

# उचितसमये एव उचितकार्यं कुरु

## लघुरूपकम्

लेखकः रामुलु गजवाड Rāmulu Gajavāḍa Saṇskṛtam Teacher

पात्रधाराः

| | |
|---|---|
| कृष्णाचार्यः | विद्यालये संस्कृत अध्यापकः |
| पद्मलोचनः | सुरेशस्य सङ्गीत अध्यापकः |
| सुनीति | रमेशस्य माता |
| नलिनी | सुरेशस्य माता |
| रमेशः | छात्रः |
| सुरेशः | छात्रः |
| महामद् महोदयः | छात्रः |
| नारायणः | छात्रः |
| जानकी | छात्रा |
| लता | छात्रा |

प्रथमभागः ।

रमेशः सुरेशस्य गृहाग्रे तिष्ठन् वदति।

**रमेशः** --- भोः सुरेश ! इदानीम् सायंकाले पञ्चवादनमस्ति। मया सह आगच्छतु। आवां क्रीडाङ्गणे कन्दुकेन खेलावः।

सुरेशस्य माता नलिनी द्वारं उद्घाटयति।

**नलिनी** --- हे रमेश ! इदानीम् सुरशः गृहे नास्ति। त्वं गृहं गच्छ।

रमेशः सुरेशस्य गृहस्य पृष्ठं गच्छति। गवाक्षेण सुरेशं पश्यति। सुरेशः अध्यापकेन सह वीणाभ्यासं करोति।

पद्मलोचनः --- सुरेश ! अद्य भवान् वीणां सम्यक् न वादयति । केन कारणेन ? ह्यः वीणावादनस्य अभ्यासं कृतवान् वा ?

सुरेशः आचार्य ! आम् । अभ्यासं कृतवान्।

पद्मलोचनः --- सुरेश ! भवतः मित्रं गवाक्षेण पश्यति।

किं कारणम् ? सः भवता सह वक्तुमिच्छति ।

**सुरेशः** --- भोः रमेश ! गच्छतु। इदानीम् अहं वीणाभ्यासं करोमि। श्वः विद्यालये कक्ष्यायां मेलिष्यावः।

सुरेशस्य माता नलिनी रमेशं पश्यति।

**नलिनी ---** हे रमेश ! मम गृहं मा आगच्छ। भवान् विद्याभ्यासं कदापि करोति वा ? भवान् सर्वदा क्रीडाविषये एव चिन्तयति। अहं भवतः मातरं भवतः विषये कथयिष्यामि।

**द्वितीयभागः**

**विद्यालये संस्कृतकक्षायां अध्यापकः कृष्णाचार्यः ---** सुप्रभातम्। अद्य कक्षायां के के उपस्थिताः ?

**छात्राः ---** अहं रमेशः उपस्थितोऽस्मि। अहं सुरेशः उपस्थितोऽस्मि । अहं गोविन्दः उपस्थितोऽस्मि । अहं नारायाणः उपस्थितोऽस्मि। अहं महमद् महोदयः उपस्थितोऽस्मि। अहं जानकी उपस्थिताऽस्मि। अहं लता उपस्थिताऽस्मि।

**कृष्णाचार्यः अध्यापकः ---** सम्यक् । आरम्भे अहं " ॐ सहनाववतु " इति श्लोकं पठामि । भवन्तः सर्वे अनुपठन्तु

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।

तेजस्विनावधीतमस्तु मा विद्विषावहै।

ॐ शान्तिः शान्तिः शन्तिः

सहनाववतु (स ह नौ अवतु) May He protect us both, Teacher and the taught; सहनौ भुनक्तु May He nourish us both. ; सहवीर्यं करवावहै May we both be vigorous and do work with strength.; तेजस्विनावधीतमस्तु May our study be bright with intelligence.; माविद्विषावहै May there be no misunderstading and hatred between us.

अध्यापकः --- साधु साधु। अतीव सन्तुष्टोस्मि। आङ्ग्लभाषायां अनुवादं कुर्मः। अद्य वयम् आदिकविवाल्मीकेः रचित रामायणस्य विषये चर्चां कुर्मः। तदनन्तरं कालिदास्य विषये चर्चां कुर्मः। अहं एकं श्लोकं पठामि । मया सह सर्वे अनुपठन्तु।

कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरुह्य कविता शाखां वन्दे वाल्मिकिकोकिलम्॥

कूजन्तं singing. राम राम इति Thus: Rāma Rāma. मधुरं melodious. मधुराक्षरं sweet words. आरुह्य having climbed. कविता शाखां branch of the poetry वन्दे I salute. वाल्मिकि कोकिलम् Vālimiki the nightingale.

**I salute the Sage Vālmiki the nightingale of poets, the who having climbed the the branch of poetry melodiously sings, sweet words Rāma Rāma.**

इदानीं वयं कालिदासस्य रचयित रघुवंशमिति काव्ये प्रथमश्लोकं पठामः।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

**I salute the divine mother *Pārvatī*** **and supreme lord *Parameśvara* who are together like words and their meaning,** **parents of the world** **for knowledge of words (speech) and their meaning.**

वाक् = words, speech, अर्थ = meaning, इव = like, as, सम्पृक्तौ = together, प्रतिपत्तये (4th decl.) = for knowledge, वागर्थ = words and their meaning, जगतः = of the world, पितरौ = parents (mother & father), वन्दे = I salute, पार्वती- परमेश्वरौ , पार्वती = Pārvatī, supreme goddess (शक्ति *śakti*), परमेश्वर = supreme Lord (शिव).

**अध्यापकः** --- ह्यस्तन परीक्षायां रमेशः प्रथमस्थानं प्राप्तवान्। प्रतिपरीक्षायां भवान् प्रथमस्थाने एव भवति। रमेश ! अतीव प्रसन्नोस्मि। अभिनन्दनानि। असतु। वयं श्वः नववादने अस्मिन् कोष्टे एव मेलिष्यामः । तदनन्तरं शुभमस्तु ॥

तृतीयभागः

**सुरेशः** --- मातः ! रमेशः कक्ष्यायाः परीक्षायां प्रथमस्थानं प्राप्तवान्।
सुरेशस्य माता **नलिनी** --- रमेशः कदापि न पठति, सदा कन्दुकेन खेलितुं एव चिन्तयति। किमर्थं परीक्षायां प्रथमस्थानं प्राप्तवान्।

**सुरेशः** -- मातः ! तत् सत्यं नास्ति। रमेशः सर्वासु कक्षासु सम्यक् पठति। सर्वे अध्यापकाः तं प्रशंसन्ति। अहं रमेशं तस्य मात्रा सहितं भोजनार्थं निमन्त्रितवान्। अद्य सायंकाले तौ अस्माकं गृहं आगमिष्यतः।

चतुर्थभागः

तस्मिन् सायंकाले एव रमेशः मात्रा सह सुरेशस्य गृहं आगच्छत्।

सुरेशः --- सुनीति मातः ! रमेश ! नमस्ते स्वागतम्।

सुनीति --- नमस्ते । धन्यवादः।

नलिनी --- सुनीति ! नमस्ते। भवत्याः आगमनेन च भवतीं दृष्ट्वा अति प्रसन्ना अस्मि। एषु दिनेषु भवती कथमस्ति?

सुनीति --- नलिनि ! एषु दिनेषु मम आरोग्यं सम्यकस्ति। अहं कुशलिनी अस्मि।

सुरेशः --- अद्य कन्दुकखेलनं कथमासीत् ?

रमेशः --- अद्य सायंकाले कन्दुकक्रीडा सम्यक् आसीत्।

**नलिनी** --- सुनीति ! रमेशः कदापि पाठान् पठति वा ? सः प्रतिदिनं किं करोति ?

**सुनीति** --- रमेश ! भवतः दिनचर्यां सुरेशस्य मातरं विस्तारेण कथयतु।

**रमेशः** --- प्रातः पञ्चवादने शयनात् उत्तिष्ठामि। सार्धपञ्चवादनपर्यन्तं शौचगृहे मुखक्षालनं दन्तक्षालनं इत्यादीनि कार्याणि करोमि। तदनतरं सार्धपञ्चवादनतः

षड्वादनपर्यन्तं योगासनाभ्यासं करोमि। षड्वादने स्नानं करोमि। तदनन्तरं ध्यानं करोमि च वेदपठनाभ्यासं पाठशालायां पठितपाठान् पठामि। अष्टवादने भोजनं करोमि। सार्धअष्टवादने विद्यालयं गच्छामि। सायंकाले पञ्चवादनतः षड्वादनपर्यन्तं क्रीडाङ्गणे कन्दुकेन खेलामि। षड्वादने भोजनं स्वीकरोमि। सार्धषड्वादनतः सार्धसप्तवादनपर्यन्तं मुरलीवादनाभ्यासं करोमि। सार्धसप्तवादनतः दशवादनपर्यन्तं विद्यालयस्य गृहकार्यं करोमि च पुस्तकानि पठामि। तदनन्तरं निद्रां करोमि।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ १

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र दैवं सहायकृत्॥ २

सुरेशः प्रतिदिनं सर्वाणि कार्याणि उद्यमेन अपि उचितसमये करोति। ततः सः प्रति परीक्षायां प्रथमस्थानं प्राप्नोति॥

समाप्तम्।